# सीताराम स्तोत्रम्

अयोध्यापुर नेतारं मिथिलापुर नायिकाम् ।
राघवाणा मलङ्कारं वैदेहाना मलङ्क्रियाम् ॥ १॥

रघूणां कुलदीपं च निमीनां कुलदीपिकाम् ।
सूर्यवंश समुद्भूतं सोमवंश समुद्भवाम् ॥ २॥

पुत्रं दशरथ स्याद्यं पुत्रीं जनक भूपतेः ।
वशिष्ठानुमताचारं शतानन्दमतानुगाम् ॥ ३॥

कौसल्यागर्भ सम्भूतं वेदिगर्भोदितां स्वयम् ।
पुण्डरीक विशालाक्षं स्फुर दिन्दीवरेक्षणाम् ॥ ४॥

चन्द्रकान्तान नाम्भोजं चन्द्रबिम्बोप माननाम् ।
मत्त मातङ्ग गमनं मत्त हंस वधू गताम् ॥ ५॥

चन्दनार्द्र भुजामध्यं कुङ्कुमार्द्र कुचस्थलीम् ।
चापालङ्कृत हस्ताब्जं पद्मालङ्कृत पाणिकाम् ॥ ६॥

शरणागत गोप्तारं प्रणिपाद प्रसादिकाम् ।
कालमेघनिभं रामं कार्तस्वर समप्रभाम् ॥ ७॥

दिव्य सिंहास नासीनं दिव्य स्रग्वस्त्र भूषणाम् ।
अनुक्षणं कटाक्षाभ्यां अन्योन्येक्षण काङ्क्षिणौ ॥ ८॥

अन्योन्य सदृशाकारौ त्रैलोक्यगृह दम्पती।
इमौ युवां प्रणम्याहं भजाम्यद्य कृतार्थताम् ॥ ९॥

अनेन स्तौति यः स्तुत्यं रामं सीतां च भक्तितः ।
तस्य तौ तनुतां पुण्या स्सम्पदः सकलार्थदाः ॥ १०॥

एवं श्रीरामचन्द्रस्य जानक्याश्च विशेषतः ।
कृतं हनूमता पुण्यं स्तोत्रं सद्यो विमुक्तिदम् ।
यः पठेत्प्रातरुत्थाय सर्वान् कामा नवाप्नुयात् ॥ ११॥

॥ इति हनूमत्कृत सीताराम स्तोत्रं सम्पूर्णम् ॥